इत्यादीनि सर्वाण्यपि रूपाणि जौहोत्यादिकपिपर्तिवत् (1044) ज्ञेयानि। शानचि---[1]व्याप्रियमाणः, इति रूपम् ।

(1047) "पृच संयमने" (X-चुरादिः-1808. सक. सेट्. उभ.)

आधृषीयः ।

'पृणक्ति पृक्ते (पृङ्क्ते) सम्पर्के, यौ पर्चयति पर्चति ॥' (श्लो. 51) इति देवः। 'पृची सम्पर्चने' इति क्षीरस्वामी। देवोऽप्यत्रानुकूलः। '–'सम्बन्धने–' इति क्षीरस्वामी।' इति पुरुषकारे। आधृषीयत्वेन णिज्विकल्पः। पर्चकः-र्चिका, पिपर्चयिषकः-षिका, पर्चकः-र्चिका, पिपर्चिषकः-षिका, परीपृचकः-चिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचर्पयतिवत् (554) ज्ञेयानि।

(1048) "पृची सम्पर्चने" (II-अदादिः-1030. सक. सेट्. आत्म.)

सम्पर्चनम्=मिश्रीकरणम्।

'पृणक्ति पृक्ते (पृङ्क्ते) सम्पर्के, यौ पर्चयति पर्चति ॥' (श्लो. 51) इति देवः। "उदित्–इति दुर्ग-काश्यप-नन्दि-धनपालादयः। 'इदित्, तृतीयान्तः।' इति कौशिकः। 'ईदित्—' इत्यपरे। तत्र वृत्तौ 'सम्पृच—,' (3-2-142) आदिसूत्रे, "पृची सम्पर्के' इति रुधादिर्गृह्यते, न त्वदादिः।'' इत्यभिधानात् प्रथमान्त ईदिदेव युक्तः।" इति मा. धा. वृत्तौ। 'पृचे–' इति शाकटायनः।

पर्चकः-र्चिका, पर्चकः-र्चिका, पिपर्चिषकः-षिका, परीपृचकः-चिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगृजधातुवत् (422) ज्ञेयानि। [2]पृक्तः-पृक्तम्-पृक्तवान्, इति, [3]पृच्यम्, [4]सम्पर्कः, मधुपर्कः, [5]संपृचानः इति च रूपाणि धातोरस्य निष्ठा-ण्यद्-घञादिषु भवन्तीति विशेषः।

---

1. शानचि, 'तुदादिभ्यः'—(3-1-77) इति शप्रत्यये, 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेशः।
2. 'श्वीदितो निष्ठायाम्' (7-2-14) इतीण्निषेधः।
3. 'ऋदुपधात्—' (3-1-110) इति भावकर्मणोः क्यप्।
4. निष्ठायामनिट्त्वात्, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वम्।
5. शानचि, 'अदिप्रभृतिभ्यः—' (2-4-72) इति शपो लुकि रूपम्।